CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
SDPB.
Coll. No. 348

Title Svasti Vāçan

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 348. Subject: Vaidic literature

Title: Svasti Vāçan

Author: — Scribe: —

Date of the work: — Date of the Ms.: V.S. १८३२

Place of the work: — Place of the Ms.: —

Size: 8.7" by 5.1" Extent: 6 foll.

Language: Sanskrit. Script: Devanāgari

Remarks:

॥श्रीगणेशायनमः॥ ॥अथस्वस्तिवाचनलिख्यते॥संपूज्यगंधमाल्या
द्यैर्ब्राह्मणान्स्वस्तिवाचयेत्॥धर्मकर्मणिमांगल्येसंग्रामाद्भुतदर्शने
॥पुण्याहवाचनंदैवेब्राह्मणस्यविधीयते॥एतदेवनिरोंकारंकुर्यात्क्ष
त्रियवैश्ययोः॥अवनिकृतजानुमंडलंकमलमुकुलसदृशमंजलिं
शिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वादीर्घा
नागानद्योगिरयस्त्रीणिविष्णुपदानिच॥तेनआयुःप्रमाणेनपुण्या
हंदीर्घमायुरस्तु॥शिवाआपःसंतु॥सौमनस्यपुष्पमस्तु॥अक्षतंचा १
रिष्टंचास्तु॥गंधाःपांतुमांगल्यंचास्तु॥पुष्पाणिपांतु॥सुश्रियमस्तु॥

अक्षताःपांतु॥आयुष्यमस्तु॥तांबूलानिपांतु॥ऐश्वर्यमस्तु॥दक्षिणा
पांतु॥आरोग्यमस्तु॥दीर्घमायुःशांतिपुष्टिस्तुष्टिश्रीर्यशोविद्याविनयो
वित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु॥यंकृत्वासर्ववेदयज्ञक्रियाकरण
कर्मारंभाःशुभाःशोभनाःप्रवर्त्तंते॥प्रवर्त्ततां॥तमहमोंकारमादिंकृत्वा
ऋग्यजुःसामाथर्वाशीर्वचनंबहुऋषिमतंसंविज्ञातं॥बद्भिरनुज्ञातः
पुण्यंपुण्याहंवाचयिष्ये॥वाच्यतां॥द्रविणोदाद्रविणसस्तुरस्य॥द्रविणोदाः
सनरस्यप्रयंसत्॥द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घ
मायुः॥१॥सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरा

त्तान्॥सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः॥२॥नावा
नवोनवतिजायमानोह्नांकेतुरुषसामेत्यग्रं॥भागंदेवेभ्योविदधा
त्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः॥३॥उच्चादिविदक्षिणावंतोऽअ
स्थुर्येऽअश्वदाःसहतेसूर्येण॥हिरण्यदाःअमृतत्वंभजंतेवासोदाः
सोमप्रतिरंतंनऽआयुः॥४॥इत्येताऽऋचयःपुण्याहेब्रूयात्॥व्रतनि
यमतपस्वाध्यायक्रतुर्दमदानविविशिष्टानांसर्वेषांब्राह्मणानांमनः
समाधीयतां॥समाहितमनसस्मः॥प्रसीदंतुभवंतः॥प्रसन्नास्मः॥शांति २
रस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु॥वृद्धिरस्तु॥ऋद्धिरस्तु॥अविघ्नमस्तु॥आ

युष्यमस्तु॥आरोग्यमस्तु॥शिवंकर्मास्तु॥कर्मसमृद्धिरस्तु॥पुत्रसमृद्धि
रस्तु॥वेदसमृद्धिरस्तु॥शास्त्रसमृद्धिरस्तु॥इष्टसंपदस्तु॥अनिष्टनिर
सनमस्तु॥यत्पापंरोगंदुरितंऽअशुभंअकल्याणंतद्दूरेप्रतिहतमस्तु
॥यच्छ्रेयस्तदस्तु॥उत्तरेकर्मण्यविघ्नमस्तु॥उत्तरोत्तरमहरहरभिवृद्धि
रस्तु॥उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंते॥संपद्यंतां॥तिथि
करणमुहूर्तनक्षत्रसंपदस्तु॥तिथिकरणेमुहूर्तनक्षत्रग्रहलग्नाधिदेव
ताःप्रीयंतां॥तिथिकरणेमुहूर्तेसनक्षत्रेसग्रहेसलग्नेसदैवतेप्रीयेतां॥
दुर्गापांचाल्यौप्रीयेतां॥अग्निपुरोगाविश्वेदेवाःप्रीयंतां॥इंद्रपुरोगामरुद्ग

ब्रह्म च ब्राह्मणाश्च प्रीयंतां ३२

णाः प्रीयंतां॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां॥ महेश्वरपुरोगा रुद्रामा
तरः प्रीयंतां॥ अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां॥ विष्णुपुरोगा सर्वे देवाः
प्रीयंतां॥ ब्रह्मपुरोगा सर्वे वेदाः प्रीयंतां॥ अंबिका सरस्वत्यौ प्रीयेतां॥ श्र
द्धामेधे प्रीयेतां॥ भगवती कात्यायनी प्रीयतां॥ भगवती माहेश्वरी प्रीय
तां॥ भगवती ऋद्धिकरी प्रीयतां॥ भगवती सिद्धिकरी प्रीयतां॥ भगवती
तुष्टिकरी प्रीयतां॥ भगवती पुष्टिकरी प्रीयतां॥ भगवंतौ विघ्नविना
यकौ प्रीयेतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ सर्वा ग्रामदेवताः प्रीयंतां॥ ३
सर्वा इष्टदेवताः प्रीयंतां॥ हताश्च ब्रह्मद्विषः॥ हताश्च परिपंथिनः

हताश्च विघ्नकर्तारः॥ हताश्च विघ्नकराः॥ शत्रवः पराभवं यांतु॥ शाम्यंतु घो
राणि॥ शाम्यंतु पापानि॥ शाम्यंत्वीतयः॥ शुभानि वर्द्धंतां॥ शिवा आपः संतु॥
शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा ओषधयः संतु॥ शिवा वन
स्पतयः संतु॥ शिवा वनस्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे
शिवे स्यातां॥ शंनः कनिक्र०॥ निकामे निकामे नः०॥ शुक्रांगारकबुधबृह
स्पतिशनिश्चरराहुकेतुसोमसहित आदित्यपुरोगा सर्वे ग्रहाः प्रीयंतां
॥ भगवान्नारायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीयतां॥ भगवान्स्वामि
महासेनः प्रीयतां॥ पुरोनुवाक्यया यत्पुण्यं तदस्तु॥ याज्यया यत्पुण्यं तद

स्तु॥वषट्कारेणयत्पुण्यंतदस्तु॥प्रातःसूर्योदयेयत्पुण्यंतदस्तु॥एतत्क
ल्याणयुक्तंपुण्यंपुण्याहंवाचयिष्येवाच्यतां॥ब्राह्मंपुण्यंमहर्यच्चसृष्ट्यु
त्पादनकारकं॥वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः॥अहोब्राह्मणाः
ममसकुटुंबस्यसपरिवारस्यगृहेपुण्याहंभवंतोब्रुवंतु॥इतित्रिःपु
ण्याहं३॥उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि॥
वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकु
नेपुण्यमावद॥५॥पुनंतुमादेवजनाःपुनंतु०॥२॥पुनानःसोमा०॥पुनंतु ४
मादेवजनाःपुनंतुमनवोधिया॥पुनंतुविश्वाभूतानिपवमानःपुनातुमां

॥पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतं॥ऋषिभिःसिद्धगंधर्वैस्त
त्कल्याणंब्रुवंतुनः॥अहोब्राह्मणाःममसकुटुंबस्यसपरिवार
स्यगृहेकल्याणंभवंतोब्रुवंतु॥३॥कल्याणं३॥अपाःसोममस्तमिं
द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते॥यत्रारथस्यबृहतोनिधानं
विमोचनंवाजिनोदक्षिणावत्॥५॥यथेमांवाचं०२॥कायानश्चित्र०
॥विश्वजित्कल्याण्यैमापरिदेहिका॥कल्याणिद्विपाच्चसर्वंनोर
क्षचतुष्पाद्यच्चनःस्वं॥६॥सागरस्यतुयाऋद्धिर्महालक्ष्म्यादिभिः
कृता॥संपूर्णासुप्रभावासानोऋद्धिंब्रुवंतुनः॥अहो०३॥ऋध्यतां३॥

त्रध्यामस्तोमंस्तौमिमंमनुयामवाजमानोमंत्रंसरथेहोपयानं॥यशोनपक्वं
मधुगोष्वंनरान्नूनांशोअश्विनोःकाममप्राः॥१॥सत्रस्यऋद्धिं०॥२॥औहो
वा३०॥३॥त्रधयज्ञंत्रोयोनिंयआबभूवामृतासुर्वर्द्धमानःसुजन्मा॥अ
दब्धासुर्भ्राजमानोनोहेवत्रितोधर्त्तोदाधारत्रीणि॥४॥स्वस्तिर्याविनाश्या
ख्यातत्पुण्यकल्याणवृद्धिदा॥विनायकप्रियानित्यंतांस्वस्तिंब्रुवंतुनः॥अ
हो०॥स्वस्तिंनवंनोब्रुवंतु॥३॥स्वस्ति३॥स्वस्तिऋद्धिप्रपथेश्रेष्ठारेकृणस्व ५
त्यभियावामेति॥सानोअमासोअरणेनिंतुस्वावेशातवतुदेवगोपाः
॥१॥स्वस्तिनऽइन्द्रो०॥त्रातारमिंद्रमवि०॥३॥स्वस्तिमात्रेउतपित्रेणोऽस्तु

मा

स्वस्तिगोभ्योजगतेपुरुषेभ्यः॥विश्वंसुभूतंसुविदत्रंनोअस्तुज्योगेवदृ
शेमसूर्यं॥मृकंडस्वनीरायुर्यत्तद्वन्मलोमशयोस्तथा॥आयुरातेनगंध
र्वाजीवेमशरदांशतं॥जीवंतुशरदः॥शतंजीवशरदो०॥तच्चक्षुर्देवहितं
॥आयुर्विश्वायु०॥आयुरस्मैधेहि०॥शिवगौरीविवाहेयाश्रीरामेणनृपात्म
जे॥धनदस्यचयाश्रियास्माकंसास्तुसद्मनि॥अस्तुश्री॥श्रियेजातःश्रि
यआ०॥दैव्यायधर्त्रेजो०॥तद्राइंद्रस्यरातया०॥एहयातुवरुणःसो०॥प्रजा
पतिर्लोकपालोधाताब्रह्माचदेवराट्॥भगवान्छाश्वतोनित्योयोरक्षं
तुसर्वतः॥भगवान्प्रजापतिःप्रीयतां॥प्रजापतेनत्वदे०॥प्रजापतेनत्व

दे०॥हा०३ इमाः३ प्रजाः॥ प्रजापतेराष्टतोब्र०॥ आयुष्मते स्वस्तिमते
यजमानाय दाशुषे॥ सर्वैरत्राशिषः संतु स्वास्ति निर्वेदपारगैः॥ आ
युष्मतेस्वस्ति॥ स्वस्तये वाजिभिश्च प्रणेत०॥ त्रातारमिंद्रम०॥ त्यमुषुवाजी
नं०॥ वेदस्वस्तिर्ध्रुघणाः स्वा०॥ ॥इतिबह्वृचपरिशिष्टे दानखंडोक्तवचनां
स्वस्तिवाचनसंपूर्णं॥ ॥शंवं०१९३२ भाद्रपदवदी५शुक्रलिखितं॥
॥शुभंभवतु॥